योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ५१

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

ततःप्रभृति तत्रासौ प्रसिद्धस्तापसाश्रमे ।

कदम्बदाशूर इति शूरस्तपसि दारुणे ।। १

तस्मिँल्लतादले स्थित्वा विलोक्य ककुभः क्षणात् ।

दृढपद्मासनं बद्ध्वा दिग्भ्यः प्रत्याहृतात्मना ।। २

अज्ञातपरमार्थेन क्रियामात्रे च तिष्ठता ।

फलकार्पण्ययुक्तेन मनसा सोऽकरोन्मखम् ।। ३

नभोगतलतापत्रसंस्थितेनान्तरात्मना ।

सर्वाः स्वमनसा तेन कृता यज्ञक्रियाः क्रमात् ।। ४

तत्रासौ दश वर्षाणि मनसैवायजत्सुरान् ।

गवाश्वनरमेधाद्यैर्यज्ञैर्विपुलदक्षिणैः ।। ५

कालेनामलतां याते वितते तस्य चेतसि ।

बलादवततारान्तर्ज्ञानमात्मप्रसादजम् ।। ६

ततो विशीर्णावरणो विगलद्वासनामलः ।

स ददर्शैकदा तस्यां लतायामग्रतः स्थिताम् ।। ७

वनदेवीं विशालाक्षीमालोककुसुमाम्बराम् ।

कामिनीं कान्तवदनां मदघूर्णितलोचनाम् ।। ८

नीलोत्पलामोदवतीमतीव सुमनोहराम् ।

तामुवाचानवद्याङ्गीं स मुनिर्विनताननाम् ।। ९

कोकिलाकुसुमापूरनतां वनलतामिव ।

का त्वमुत्पलपत्राक्षि कान्तिविक्षोभितस्मरा ।। १०

वयस्यामिव पुष्पाढ्यां लतां किमिव तिष्ठसि ।

इत्युक्ते मृगशावाक्षी गौरपीनपयोधरा ।। ११

मुनिमाह मनोहारि मुग्धाक्षरमिदं वचः ।

यानि यानि दुरापानि वाञ्छितानि महीतले ।। १२

प्राप्यन्ते तानि तान्याशु महतामेव याच्ञया ।

अहमस्मिँल्लताकीर्णे त्वत्कदम्बाभ्यलंकृते ।। १३

लतालीलालया ब्रह्मन्विपिने वनदेवता ।

यश्चैत्रसितपक्षस्य त्रयोदश्यां स्मरोत्सवे ।। १४

बभूव वनदेवीनां समाजो नन्दने वने ।

तत्राहमगमं नाथ त्रैलोक्यललनासदः ।। १५

तत्र दृष्टा मया सर्वा वयस्या मदनोत्सवे ।

अपुत्रया पुत्रयुतास्तेनाहं दुःखिता भृशम् ।। १६

त्वयि सर्वार्थसार्थस्य बृहत्कल्पतरौ स्थिते ।

अनाथेव कथं नाथ किल शोचाम्यपुत्रिका ।। १७

देहि मे भगवन्पुत्र नो चेद्देहमिहाग्नये ।

प्रकरोम्याहुतिं पुत्र दुःखदाहोपशान्तये ।। १८

तामित्युक्तवतीं तन्वीं विहस्य मुनिपुङ्गवः ।

आह हस्तगतं पुष्पं तस्यै दत्त्वा दयान्वितः ।। १९

गच्छ तन्वङ्गि मासेन पूजार्हमलिलोचनम् ।

प्रसोष्यसे सुतं कान्तं प्रसूनमिव सल्लता ।। २०

किंत्वसौ मरणावेशयायिन्या नस्त्वया सुतः ।

याचितः कृच्छ्रं संप्राप्य ज्ञाता तेन भविष्यति ।। २१

इत्युक्त्वा स मुनिस्तन्वीं प्रसन्नमुखमण्डलाम् ।

परिचर्यां करोमीति प्रार्थनोत्कां व्यसर्जयत् ।। २२

सा जगामात्मसदनं सोऽतिष्ठत्स्वात्मना सह ।

अवहत्क्रमशः काल ऋतुसंवत्सराङ्कितः ।। २३

अथ दीर्घेण कालेन सैवोत्पलविलोचना ।

द्वादशाब्दमुपादाय सुतं मुनिमुपाययौ ।। २४

सा प्रणम्योपविश्याग्रे मुनिमिन्दुसमाननम्।

उवाच कलया वाचा चूतद्रुमभिवालिनी ।। २५

अयं स भगवन्भव्यः कुमारः पुत्र आवयोः ।

कृतो मया समग्राणां कलानां किल कोविदः ।। २३

प्रभो केवलमेतेन ज्ञानं नाधिगतं शुभम् ।

येन संसारचक्रेऽस्मिन्न पुनः परिपीड्यते ।। २७

ज्ञानं त्वमेवास्य विभो कृपयोपदिशाधुना ।

को हि नाम कुले जातं पुत्रं मौर्ख्येण योजयेत् ।। २८

एवं वदन्तीं स मुनिः सच्छिष्यमबले सुतम् ।

इहैव स्थापयैनं त्वमित्युक्त्वा तां व्यसर्जयत् ।। २९

तस्यां गतायां स पितुरन्तेवासितया तया ।

अतिष्ठत्संयतो धीमानर्कस्येवारुणः पुरः ।। ३०

कदर्थः प्राप्य विज्ञानं ततश्चित्राभिरुक्तिभिः ।

चिरकालमसौ तत्र मुनिः पुत्रमबोधयत् ।। ३१

आख्यायिकाख्यानशतैर्दृष्टान्तैर्दृष्टिकल्पितैः ।

तथेतिहासवृत्तान्तैर्वेदवेदान्तनिश्चयैः ।। ३२

अनुद्वेगितया नित्यं विस्तरेण कथाक्रमैः ।

अनुभूतिमुपारूढै रूढिमेति यथा मयि ।। ३३

अनुभववशतो रसातिरिक्तै-

रलमुचितार्थवचोगणैर्महात्मा ।

जलद इव शिखण्डिनं पुरःस्थं

तनयमबोधयदम्बरे महर्षिः ।। ३४

इत्यार्षे श्रीवसिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे दाशूरो० दाशूरसुतानुबोधनं नामैकपञ्चाशः

सर्गः ।। ५१ ।।